# Shri Samartha Ramadasa Stotram

# श्रीसमर्थ रामदास स्तोत्रम्

## Document Information

Text title : Shri Samartha Ramadasa Stotram

File name : samartharAmadAsastotram.itx

Category : deities_misc, gurudev, shrIdharasvAmI, stotra, pancharatna

Location : doc_deities_misc

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

# श्रीसमर्थ रामदास स्तोत्रम्

आदर्शान्तरबिम्बितं खलु यथा दृश्यं मृधैव स्फुटम्
तद्वद्विश्वमिदं विभाति सकलं यस्मिन् परे बस्तुनि ।
चित्सामान्यसदेकतो न च कदा यस्मिन् विकारःक्वचित्
तं वन्दे गुरुरामदासममलं सच्चित्स्वरूपं शिवम् ॥ १॥

बीजस्यान्तरवर्तिवृक्षसदृशं विश्वं यदेतन्महत्
यस्यां सूक्ष्मतयाधितिष्ठति पुरा माया मृषा सा परम् ।
यश्चाच्छादयतीव चित्रमिति तद्यत्सत्तया व्याकरोत्
तं वन्दे गुरुरामदासममलं सच्चित्स्वरूपं शिवम् ॥ २॥

सृष्ट्वाऽध्यासत एव विश्वमखिलं जीवेशबन्धादिकम्
सा यस्मिन् किल भाति सूर्यकिरणे माया मृगांम्भो यथा ।
यत्स्मृत्यैव पुनः स्वचेष्टितमिदं त्यक्त्वैत्यभावं स्वयम्
तं वन्दे गुरुरामदासममलं सच्चित्स्वरूपं शिवम् ॥ ३॥

रज्वां सर्पविभासवद् वत मृषा मायेति यस्मिन् परे
ब्रह्माहं निजवेदनेन ननु सा विद्येति सम्भाव्यते ।
जीवोषन्त्विति भावनेन हि तथाऽविद्येति च ख्यायते
तं वन्दे गुरुरामदासममलं सच्चित्स्वरूपं शिवम् ॥ ४॥

अन्यत्किञ्चन विद्यते नहि यतो यत्स्वात्मरूपं ध्रुवम्
मायाकल्पितदेशकालकलना यस्मिन्न चित्रीकृता ।
अद्वैतामृतसौख्यसिन्धुमगमद् धीर्यस्य बोधात्परम्
तं वन्दे गुरुरामदासममलं सच्चित्स्वरूपं शिवम् ॥ ५॥

पञ्चरत्नात्मकमिदं स्तोत्रं पावनमुक्तमम् ।
पठेद् गुरुमुखाच्छ्रुत्वा मुक्तिःस्वाद् गुर्वनुग्रहात् ॥ ६॥

॥ इति श्रीमत् परमहंसपरिव्राजकाचार्य सद्गुरु भगवता श्रीधरस्वामिना

विरचितं श्रीसमर्थरामदासस्तोत्रं संपूर्णम् ॥

*Shri Samartha Ramadasa Stotram*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*